**दिनाङ्क :- 02.08.2024**
**प्रात: - 06: 55**

## अथ वार्ताः

### प्रधानमन्त्री/वियतनामः

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नवदिल्लां वियतनामदेशीयेन स्वीय समकक्षेण फाम् मिन्ह् चिन्ह् इत्यनेन सह संवादः कृतः। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् भारत-वियतनाम-देशयोः सम्बन्धः विस्तृतः सुदृढः च जात अपि च गतदशवर्षाणां सम्बन्धेभ्यः समग्र-सामरिक-सहभागित्वस्य आकारः दत्तः अस्ति। संवादस्य अनन्तरम् उभौ नेतारौ वियतनाम-देशस्य न्हा-ट्राङ्ग्-नगरे दूरसञ्चार-विश्वविद्यालये सेना-तन्त्रांशोद्यानम् उद्घाटितवन्तौ। इयं भारत-वियतनाम-देशयोः पारस्परिक-परियोजना अस्ति। परियोजनायाः कृते भारतेन पञ्चलक्ष-डालरमितस्य राशिसाहाय्यं प्रदत्तम् । उभौ देशौ सीमाशुल्क-क्षमता-निर्माण-कृष्यनुसंधान-शिक्षा-सागरीयपरम्परौषधीय-वनस्पति-विधि-क्षेत्रेषु सहयोगाय सहभागिता-ज्ञापन-पत्राणि हस्ताक्षरैः प्रमाणीकृतवन्तौ। प्रसारभारती वाय्स्-आफ्-वियतनाम इति च श्रव्यांकन-दृश्यांकनयोः सहकारार्थं सहभागिताज्ञापनपत्रस्य आदान-प्रदानमपि जातम् । प्रधानमन्त्री श्रीचिन्ह: गतवासरे राष्ट्रपतिना द्रौपदीमुर्मू इत्यनया उपराष्ट्रपतिना जगदीप-धनखडेन च सह मेलनं कृतवान्।

### सर्वोच्चन्यायालयः/अनुसूचितजातिवर्गः

भारतस्य मुख्य-न्यायाधीशस्य डी.वाई. चन्द्रचूडस्य नेतृत्वे सर्वोच्च-न्यायालये सप्त-न्यायाधीशानाम् एकेन पीठेन ह्यः बहुमतेन राज्य-विधानमण्डल-द्वारा अनुसूचितजाति-अनुसूचितजनजाति-वर्गयोः अन्तर्गतम् उपश्रेण्याः अनुमति-सम्बद्धे निर्णयः श्रावितः। सर्वोच्च-न्यायालयेन चतुरधिक-द्विसहस्र-तमवर्षस्य ई.वी.चिन्नैया-इत्येतस्य निजनिर्णये प्रतिपादितमासीत् यत् अनुसूचित-जनजातिवर्गस्य आरक्षणस्य उपश्रेण्याः विभाजनं रिक्तेषु सर्वकारीय-वृत्तिषु च स्वीकार्यं नास्ति।

### केरल-भूस्खलनम्

केरलस्य वायनाड-जनपदे दुरापन्ने भूस्खलन प्रकरणे शवानां विलुप्त-जनानां च अन्वेषणाभियानं साम्प्रतमपि प्रचलति। ध्येयमस्ति यत तत्र नैके जनाः मृत्युम् उपगताः आसन्। साम्प्रतं यावत् चतुसप्तत्यधिक-द्विशतमिताः जनाः मृताः। सुरक्षोद्धारकर्मिभिः भूम्यन्तर-वर्तिनः नैके शवाः भू-स्खलन-स्थलात् अधिगताः। अधिगतेषु शवेषु नवनवति-प्रतिशत-मिताः शवाः अधुनापि अनभिज्ञाताः एव सन्ति। मृतकानां संख्या इतोऽपि वर्धिष्यते इति सम्भाव्यते। आधिकारिक-स्रोतांसि सूचयन्ति यत् अस्यां दुर्घटनायां व्रणिताः नैके

जनाः विभिन्नेषु चिकित्सालयेषु उपचाराधीनाः सन्ति । ध्वंसावशेषेषु निरुद्धानां जनानाम् उद्धाराय अधुना अपि आपद्-मोचनबलानि, राज्य-सर्वकारस्य विभागाः जनताः च पूर्णतो दृशा प्रयासपराः सन्ति ।

**बिहारम्/तडित्पातः**

बिहारे, तडित्पातेन न्यूनातिन्यूनं दश जनाः मृत्युम् उपगताः सूच्यन्ते।

अपरतः, हिमाचले अनारतं घनासार-वृष्टिः जायते। तत्र अनेके जनाः विलुप्ताः सन्ति।

**ओलम्पिक्-क्रीडाः**

पेरिसक्रीडा-महाकुम्भे लक्ष्य-वेधकः स्वप्निलः कुसालेः पुरुषाणां पञ्चाशत्-मीटर-रायफल-थ्री-पोजिशन-शूटिंग् इति स्पर्धायां भारताय तृतीयं कांस्य पदकं विजितवान्। पुरुषाणां पञ्चाशत्-मीटर्-रायफल्-थ्री-पोजिशन्-शूटिंग्-योग्यतार्जन-स्पर्धायां कुसालेः सप्तमे स्थाने स्थित्वा अन्तिम-द्वन्द्वे स्थानम् अधिगतवान्।

अत्रावसरे प्रधानमन्त्री श्रीनरेन्द्र-मोदी कांस्य-पदक-विजयम् अभिलक्ष्य स्वप्निल-कुसालेः इत्यस्मै मंगलवचोभिः वर्धापनानि प्रदत्तवान्। एकस्मिन् सामाजिक-सञ्जाले प्रेषिते सन्देशे श्रीमोदी अलिखत् यत् तस्य क्रीडाप्रदर्शनम् उत्कृष्टं विशिष्टं च वर्तते। यतोहि तेन अद्भुतं क्रीडाकौशलं प्रदर्शितम्। श्रीमोदी प्रोक्तवान् यत् सः अस्यां श्रेण्यां पदकस्य विजेता प्रथमः भारतीयः क्रीडकः संवृत्तः अस्ति। अनेन पदकार्जनेन समस्ते भारते प्रसन्नतायाः लहरी वर्तते।

**क्रिकेट्**

भारत-श्रीलंकयोः त्रि-स्पर्धात्मिकायाः एकदिवसीय-क्रिकेट्-क्रीडा-मालिकायाः प्रथमं द्वन्द्वम् अद्य कोलम्बो-नगरे भविष्यति। इयं स्पर्धा आर्.प्रेमदासा-क्रीडाङ्गणे दिने सार्ध-द्वि-वादने आरप्स्यते।

**।। इति वार्ताः।।**